श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये षट्पञ्चाशं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये षट्पञ्चाशं दशकम् ॥

## कालियमर्दने भगवदनुग्रहवर्णनम्

रुचिरकम्पितकुण्डलमण्डलः
  सुचिरमीश ननर्तिथ पन्नगे।
अमरताडितदुन्दुभिसुन्दरं
  वियति गायति दैवतयौवते ॥ **56.1** ॥

नमति यद्यदमुष्य शिरो हरे
  परिविहाय तदुन्नतमुन्नतम्।
परिमथन् पदपङ्करुहा चिरं
  व्यहरथाः करतालमनोहरम् ॥ **56.2** ॥

त्वदवभग्नविभुग्नफणागणे
  गलितशोणितशोणितपाथसि।
फणिपताववसीदति सन्नता -
  स्तदबलास्तव माधव पादयोः ॥ **56.3** ॥

अयि पुरैव चिराय परिश्रुत -
  त्वदनुभावविलीनहृदो हि ताः।
मुनिभिरप्यनवाप्यपथैः स्तवै -
  र्नुनुवुरीश भवन्तमयन्त्रितम् ॥ **56.4** ॥

फणिवधूगणभक्तिविलोकन -
  प्रविकसत्करुणाकुलचेतसा।

फणिपतिर्भवताऽच्युत जीवित -
स्त्वयि समर्पितमूर्तिरवानमत् ॥ **56.5** ॥

रमणकं व्रज वारिधिमध्यगं
फणिरिपुर्न करोति विरोधिताम्।
इति भवद्वचनान्यतिमानयन्
फणिपतिर्निरगादुरगैः समम् ॥ **56.6** ॥

फणिवधूजनदत्तमणिव्रज -
ज्वलितहारदुकूलविभूषितः।
तटगतैः प्रमदाश्रुविमिश्रितैः
समगथाः स्वजनैर्दिवसावधौ ॥ **56.7** ॥

निशि पुनस्तमसा व्रजमन्दिरं
व्रजितुमक्षम एव जनोत्करे।
स्वपति तत्र भवच्चरणाश्रये
दवकृशानुररुन्ध समन्ततः ॥ **56.8** ॥

प्रबुधितानथ पालय पालये -
त्युदयदार्तरवान् पशुपालकान्।
अवितुमाशु पपाथ महानलं
किमिह चित्रमयं खलु ते मुखम् ॥ **56.9** ॥

शिखिनि वर्णत एव हि पीतता
परिलसत्यधुना क्रिययाऽप्यसौ।
इति नुतः पशुपैर्मुदितैर्विभो
हर हरे दुरितैः सह मे गदान् ॥ **56.10** ॥

॥ इति श्रीमन्नारायणीये षट्पञ्चाशं दशकं समाप्तम् ॥